न्वितपदार्थज्ञानोपस्थितौ पदार्थज्ञानं विशेष्यमिति तदुपस्थितौ पदार्थस्य विषयत्वात् विशिष्टज्ञानस्य विशेष्यविषयत्वनियमादिति तत्रैव शक्तिः कल्प्यते लाघवात् नत्वन्वयांशेऽपि गौरवात् अस्तु वा प्रथममितरान्विते शक्तिग्रहोऽग्रे तस्य त्यागः आकाङ्क्षायोग्यतादिलभ्यत्वप्रतिसन्धानात् अनन्यलभ्यस्यैव शब्दार्थत्वात् प्रथमगृहीतत्वमात्रस्याकिञ्चित्करत्वात् तथा च घटशक्तत्वेन ज्ञातं पदं स्वार्थस्मरणद्वाराकाङ्क्षादिसहकारिवशात् समभिव्याहृतपदार्थेन सह स्वार्थस्यान्वयमनुभावयति स्वभावादित्यन्वयस्यैवान्वयज्ञानोदयात् किं तत्र शक्त्या, अन्वयमात्रशक्तावपि अन्वयविशेषज्ञानार्थमाकाङ्क्षादेरवश्यमपेक्षणात् तैरेव सहकारिभिरन्वयविशेषावगमसम्भवात् । क्रियाकारकपदयोः प्रत्येकमितरान्वितस्वार्थबोधकत्वेऽवान्तरवाक्यार्थद्वयबोधप्रसङ्गात् । न चैकमेव पदमन्विताभिधायकमितरत्तु अन्वयप्रतियोगिस्मारकमिति वाच्यम् अविशेषात् कस्याभिधायकत्वमित्यनिर्णयात् । किञ्च किमशक्ययोरेवान्वये शक्तिः ? उत शक्ययोः ? आद्ये यस्य कस्यापि अन्वयबोधकत्वापत्तेरतिप्रसङ्गः स्यात् तथा च शक्यान्वयाभिधायकत्वं वाच्यं एवं च शक्ये शक्यान्वये च द्विधा शक्तिः कल्पनीयेति गौरवम् । अथ अन्वयतात्पर्य्यकतया तत्प्रतिपादकं पदमित्युभयसम्मतम् तात्पर्य्यं निर्वाहिका च वृत्तिः सा च न गौणी न वा लक्षणेति अगत्या शक्तिः स्वीकार्य्येति चेत् वृत्तिं विनापि तात्पर्य्यनिर्वाहात् किं वृत्त्या, पदानामुक्तक्रमेणान्वयबोधकत्वसम्भवात् अन्यथा शक्त्यैव तात्पर्य्यनिर्वाहावश्यम्भावे लक्षणोच्छेदः स्यात् । अथ घटमानयेत्यादौ प्रत्येकमन्वये सत्येव विशेषान्वयसामान्ये जिज्ञासा भवति न च सामान्यानवगमे विशेषे सा स्यादित्यतस्तत्र शक्तिरिति चेन्न कारकेण क्रियायाः क्रियया च कारकस्य सामान्यत आक्षेपात् दृष्टे फले तदीयरसजिज्ञासावत् तदुपपत्तेः ततश्च पदार्थे एव शक्तिः न पदार्थान्वयांशे तस्मात् पदज्ञानं करणं पदार्थस्मरणं व्यापारः आकाङ्क्षादिसहकारसम्भृस्मारितपदार्थान्वयानुभवः फलमिति” ।

**अभिहूति** स्त्री अभि+ह्वे—क्तिन् । आभिमुख्येनाह्वाने ।

**अभिह्रुत्** त्रि० अभि+ह्रु—कर्मणि अति वेदे पृ० न गुणः । आभिमुख्येन ह्रियमाणे । “दुरितादभिह्रुतः शंसादघादभिह्रुतः” ऋ० १,१२८,५ “अभिह्रुत आभिमुख्येन ह्रियमाणान्” भा० ।

**अभिह्वर्** त्रि० अभि+ह्वृ—विच् । १ कुटिलगन्तरि “नाभिह्वरे पदं निदधाति सत्यवे” अथ० ६,७६,२ अभि+ह्वृ—कर्म्मणि अप् । अभिह्वरः उपह्वरे गन्तव्यदेशादौ ।

**अभिह्रुत्** त्रि० ह्रु कौटिल्ये कर्त्तरि अति पृ०। आभिमुख्येन कुटिलं कुर्व्वति “निनित्सोरभिह्रुतामसि” ऋ० १,१८९,६, “अभिह्रुतामाभिमुख्येन कुटिलं कुर्व्वताम्” भा० ।

**अभिह्रुति** स्त्री अभि+ह्रु—क्तिच् वेदे पृ० । कुटिलस्वभावे । “शतभुजिभिस्तमभिह्रुतेरघाते” ऋ० १,१६६,८ “अभिह्रुतेः कुटिलस्वभावात्” भा० ।

**अभी** त्रि० नास्ति भीर्यस्य । भयशून्ये । कप् । अभीकोऽप्यत्र

**अभीक** त्रि० अभि+कन् “अनुकाभिकाभीकाः कमयिता” पा० नि०। १ कामयमाने “मेदस्विनः सरभसोपगतानभीकान्” माघः । २क्रूरे ३उत्सुके च । आभिमुख्येन कायति प्रकाशते दीर्घः । ४समीपे “प्रतङ्गावयो वहन्त्वस्मामभीके” ऋ० १,११८,५, “अभीके गृहसमीपे” भा०। ४ अभि+इण+कक् । ५ अभिगते त्रि० “यामन्नुष्यतामभीके” ऋ० ७,८६,१, “अभीके अभिगते” भा०। ६कवौ ७स्वामिनि च त्रि०।

**अभीक्ष्ण** त्रि० अभि+क्ष्णु—तेजने बा० ड पृ० दीर्घः अभिगतः क्षणं वा पृ०। १ सन्तते २ भृशे च । ३ क्रियापौनःपुन्ये न० । “महारथमनभीक्ष्णोपसेवितम्” रामा०। अभीक्ष्णस्य भावः ष्यञ् । आभीक्ष्ण्यम् सन्ततभावे “नित्यवीप्सयोः” पा० “आभीक्ष्ण्ये” इति सि०कौ० ।

**अभीक्ष्णम्** अव्य० अभि+क्ष्णु—बा० डमु पृ० दीर्घः । पौनःपुन्ये स्वरादि । “अभीक्ष्णमक्ष्णुतयाऽतिदुर्गमम्”, माघः ।

**अभीत** त्रि० अभि+इण—क्त न०त० । १ अभिगते । न भीतः विरोधे न०त० । २ भीतभिन्ने उत्साहान्विते त्रि० ।

**अभीति** स्त्री अभावे न०त०। १ भयाभावे २ तद्ज्ञानार्थायाम् अभयमुद्रायाञ्च। “परशुमृगवराभीतिहस्तं प्रसन्नम्” शिवध्यानम् । ६त० । ३ भीतिशून्ये त्रि० । अभि+इण—क्तिन् । अभिगमने ४ “अभीतिमर्य्ये” इति ऋ०७,२१,६ । “अभीतिमभिगमनम्” भा०। कर्मणि क्तिन् । ५समीपे ।

**अभीपत्** त्रि० अभि+पत—क्विप् दीर्घः । अभिगमनकर्त्तरि । “अभीपतोवृष्टिभिस्तर्पयन्तम्” ऋ० १,१६४,५२, “अभीपतोऽभिगमनवतः” भा० । [लषिते ।

**अभीप्सित** त्रि० अभि+आप+सन—क्त । १ अभीष्टे अभि-

**अभीप्सु** त्रि० अभि+आप+सन्—उ । अभिलाषुके ।

**अभीम** त्रि० विरोधे न०त० । १ भयानकभिन्ने सौम्ये ।

**अभीमान** पु० अभि+मन—क्विप् वा दीर्घः । अभिमानशब्दार्थे

**अभीर** पु० अभिमुखीकृत्य ईरयति गाः अभि+ईरः अच् ।